॥ श्रीदत्तात्रेयस्तोत्रम् ॥

श्री गणेशाय नमः ॥ श्रीगुरवे नमः ॥

जटाधरं पांडुरंगं शूलहस्तं कृपानिधिम् ॥
सर्वरोगहरं देवं दत्तात्रेयमहं भजे ॥

अस्य श्रीदत्तात्रेयस्तोत्रमंत्रस्य ॥ भगवान्नारद ऋषिः ॥
अनुष्टुप छंदः ॥ श्रीदत्तः परमात्मा देवता ॥
श्री दत्तप्रीत्यर्थे जपे विनियोगः ॥

जगदुत्पत्तिकर्त्रे च स्थितिसंहार हेतवे ॥
भवपाशाविमुक्ताय दत्तात्रेय नमोऽस्तुते ॥

जराजन्मविनाशाय देहशुद्धिकराय च ॥
दिगंबर दयामूर्ते दत्तात्रेय नमोऽस्तुते ॥

कर्पूरकांतिदेहाय ब्रह्ममूर्तिधराय च ॥
वेदशास्त्रपरिज्ञाय दत्तात्रेय नमोऽस्तुते ॥

ह्रस्वदीर्घकृशस्थूल-नामगोत्र-विवर्जित ॥
पंचभूतैकदीप्ताय दत्तात्रेय नमोऽस्तुते ॥

यज्ञभोक्त्रे च यज्ञाय यज्ञरुपधराय च ॥
यज्ञप्रियाय सिद्धाय दत्तात्रेय नमोऽस्तुते ॥

आदौ ब्रह्मा मध्ये विष्णुरन्ते देवः सदाशिवः ॥
मूर्तित्रयस्वरूपाय दत्तात्रेय नमोऽस्तुते ॥

भोगालयाय भोगाय योगयोग्याय धारिणे ॥
जितेंद्रिय जितज्ञाय दत्तात्रेय नमोऽस्तुते ॥

दिगंबराय दिव्याय दिव्यरूपधराय च ॥
सदोदित परब्रह्म दत्तात्रेय नमोऽस्तुते ॥

जंबुद्वीपे महाक्षेत्रे मातापुरनिवासिने ॥
जयमान, सतां देव, दत्तात्रेय नमोऽस्तुते ॥

भिक्षाटनं गृहे ग्रामे पात्रं हेममयं करे ॥
नानास्वादमयी भिक्षा दत्तात्रेय नमोऽस्तुते ॥

ब्रह्मज्ञानमयी मुद्रा वस्त्रमाकाशभूतले ॥
प्रज्ञानधनबोधाय दत्तात्रेय नमोऽस्तुते ॥

अवधूत सदानंद परब्रह्मस्वरूपिणे ॥
विदेहदेहरूपाय दत्तात्रेय नमोऽस्तुते ॥

सत्यरूप सदाचार सत्यधर्मपरायण ॥
सत्याश्रय परोक्षाय दत्तात्रेय नमोऽस्तुते ॥

शूलहस्त गदापाणि वनमालासुकंधर ॥
यज्ञसूत्रधर ब्रह्मन् दत्तात्रेय नमोऽस्तुते ॥

क्षराक्षरस्वरूपाय परात्परतराय च ॥
दत्तमूर्तिपरस्तोत्र दत्तात्रेय नमोऽस्तुते ॥

दत्तविद्याढ्य लक्ष्मीश दत्तस्वात्मस्वरूपिणे ॥
गुणनिर्गुणरूपाय दत्तात्रेय नमोऽस्तुते ॥

शत्रुनाशकरं स्तोत्रं ज्ञान-विज्ञानदायकम् ॥
सर्वपापं शमं याति दत्तात्रेय नमोऽस्तुते ॥

इदं स्तोत्रं महद्दिव्यं दत्तप्रत्यक्षकारकम् ॥
दत्तात्रेयप्रसादाच्च नारदेन प्रकीर्तितम् ॥

॥ इति श्रीनारदपुराणे श्रीनारदविरचितं दत्तात्रेयस्तोत्रं संपूर्णम् ॥